# नवमः पाठः । सूक्तिसुधा । (कण्ठस्थीकरणार्थम्)

संस्कृतभाषा सुभाषितैः समलङ्कृता खलु। सुभाषितेभ्यः उद्धृताः नैकविधाः संस्कृतसूक्तयः न केवलं संस्कृते, अपि तु अन्यभाषास्वपि मार्मिकतया उत्स्फूर्ततया च उपयुक्ताः दृश्यन्ते। प्रायः जनाः सम्पूर्णं सुभाषितं न स्मरन्ति परन्तु सूक्तयः तेषां जिह्वाग्रे तिष्ठन्ति। भाषावैभवं वर्धयन्त्यः एतादृश्यः सूक्तयः छात्रैः सम्यक् पठितव्याः स्मर्तव्याः च।

**न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।**
**व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्॥१॥**

[विद्याधनं चोरहार्यं न (अस्ति), राजहार्यं न, भ्रातृभाज्यं न, भारकारि (अपि) न (अस्ति)। व्यये कृते अपि (तत्) नित्यं वर्धते एव। (सत्यमेव विद्याधनं) सर्वधनप्रधानम् (अस्ति)। ]

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्॥२॥**

[लघुचेतसां (कृते) अयं निजः परः वा इति गणना (अस्ति)। उदारचरितानां (कृते) तु वसुधा एव कुटुम्बकम् (अस्ति)।]

**परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।**
**परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम्॥३॥**

[वृक्षाः परोपकाराय फलन्ति। नद्यः परोपकाराय वहन्ति। गावः परोपकाराय दुहन्ति। इदं शरीरं परोपकारार्थम् (एव अस्ति)।]

**जाड्यं धियो हरति सिञ्चति वाचि सत्यं**
**मानोन्नतिं दिशति पापमपाकरोति।**
**चित्तं प्रसादयति दिक्षु तनोति कीर्तिं**
**सत्सङ्गतिः कथय किं न करोति पुंसाम्॥४॥**

[सत्सङ्गतिः धियः जाड्यं हरति, वाचि सत्यं सिञ्चति, मानोन्नतिं दिशति, पापम् अपाकरोति, चित्तं प्रसादयति, दिक्षु कीर्तिं तनोति। कथय ! (सा सत्सङ्गतिः) पुंसां किं (हितं) न करोति ?]

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥५॥**

[यत्र नार्यः पूज्यन्ते तत्र देवताः रमन्ते। यत्र तु एताः न पूज्यन्ते तत्र सर्वाः क्रियाः अफलाः (भवन्ति)। ]

**चातकस्त्रिचतुरान् पयःकणान् याचते जलधरं पिपासया।**
**सोऽपि पूरयति विश्वमम्भसा हन्त हन्त महतामुदारता॥६॥**

[(यदा) चातकः पिपासया जलधरं त्रिचतुरान् पयःकणान् याचते (तदा) सः (मेघः) अपि विश्वम् अम्भसा पूरयति। हन्त हन्त (कियती एषा) महताम् उदारता !]

**ते शतं हि वयं पञ्च स्वकीये विग्रहे सति।**
**परैस्तु विग्रहे प्राप्ते वयं पञ्चाधिकं शतम्॥७॥**

[युधिष्ठिरः वदति – स्वकीये विग्रहे सति ते शतं वयं हि पञ्च (स्मः)। परैः विग्रहे प्राप्ते तु वयं पञ्चाधिकं शतं (स्मः)।]

**पठकः पाठकश्चैव ये चान्ये शास्त्रवाचकाः।**
**सर्वे व्यसनिनो ज्ञेया यः क्रियावान्स पण्डितः॥८॥**

[पठकः पाठकः (तथा) च ये अन्ये शास्त्रवाचकाः (सन्ति, ते) सर्वे व्यसनिनः ज्ञेयाः। (यतः) यः क्रियावान् सः (एव) पण्डितः (अस्ति)।]

## भाषाभ्यासः

**श्लोकः १**

**१. एकवाक्येन उत्तरत।**

अ) कैः धनं न ह्रियते ?

आ) केषु धनं न विभज्यते ?

इ) सर्वधनप्रधानं किम् ?

**२. माध्यमभाषया उत्तरत।**

विद्याधनं व्यये कृते कथं वर्धते ?

**३. सन्धिविग्रहं कुरुत।** वर्धत एव।

**४. समानार्थकशब्दं लिखत।**

चोरः, भारः, नित्यम्, विद्या, धनम्, प्रधानम्।

**५. विरुद्धार्थकशब्दं लिखत।**

व्ययः, नित्यम्, प्रधानम्।

**श्लोकः २**

**१. सन्धिं कुरुत।**

(अ) परः + वा + इति (आ) वसुधा + एव

**२. एकवाक्येन उत्तरत।**

अ) 'अयं निजः, अयं परः' इति केषां गणना ?

आ) केषां कृते वसुधा एव कुटुम्बकम् भवति ?

**३. माध्यमभाषया उत्तरत।**

लघुचेतसः उदारचेतसः जनाः कथम् अभिज्ञातव्याः ?

**४. स्तम्भमेलनं कुरुत**

| | | | | |
|---|---|---|---|---|
| अ | स्वीयम् | चिन्तनम् | अन्यः | पृथिवी |
| आ | गणना | वसुधा | निजः | परः |

**श्लोकः ३**

**१. एकवाक्येन उत्तरत।**

अ) परोपकाराय वृक्षाः किं कुर्वन्ति ?

आ) परोपकाराय नद्यः किं कुर्वन्ति ?

इ) काः परोपकाराय दुहन्ति ?

ई) शरीरं किमर्थम् ?

**२. माध्यमभाषया उत्तरत।**

परोपकारः नाम किम् ? के परोपकारमग्नाः ?

**३. एकवचने परिवर्तयत।**

अ) वृक्षाः फलन्ति। आ) नद्यः वहन्ति।

**४. समानार्थकशब्दं लिखत।**

वृक्षाः, नद्यः, शरीरम्।

**५. विरुद्धार्थकशब्दं लिखत।** उपकारः, परः।

**श्लोकः ४**

**१. रिक्तस्थानं पूरयत।**

अ) सत्सङ्गतिः धियः जाड्यं ______।

आ) सत्सङ्गतिः वाचि ______ सिञ्चति।

इ) सत्सङ्गतिः ______ दिशति।

ई) सत्सङ्गतिः पापम् ______।

उ) सत्सङ्गतिः चित्तं ______।

ऊ) सत्सङ्गतिः दिक्षु ______ तनोति।

**२. माध्यमभाषया उत्तरत।**

सत्सङ्गतिः जीवने किं किं करोति ?

**श्लोकः ५**

**१. सन्धिविग्रहं कुरुत।**

नार्यस्तु, यत्रैताः, एतास्तु, तत्राफलाः, सर्वास्तत्र।

**२. एकवाक्येन उत्तरत।**

अ) देवताः कुत्र रमन्ते ?

आ) क्रियाः कुत्र अफलाः भवन्ति ?

**३. माध्यमभाषया उत्तरत।**

'यत्र नार्यः पूज्यन्ते'। इति सूक्तिं श्लोकस्य आधारेण स्पष्टीकुरुत।

**४. एकवचने परिवर्तयत।**

अ) नार्यः पूज्यन्ते। आ) देवताः रमन्ते।

इ) एताः न पूज्यन्ते। ई) सर्वाः क्रियाः अफलाः।

**५. 'नारी' इत्यर्थम् अमरकोषपङ्क्तिं लिखत।**

**श्लोकः ६**

**१. सन्धिविग्रहं कुरुत।**

अ) चातकः + ______ = चातकस्त्रिचतुरान्।

आ) सोऽपि = ______ + अपि।

इ) विश्वम् + अम्भसा = ______।

ई) महताम् + ______ = महतामुदारता।

**२. एकवाक्येन उत्तरत।**

अ) चातकः पयःकणान् कं याचते ?

आ) जलधरः केवलं चातकस्य तृष्णां शाम्यति उत सम्पूर्णविश्वस्य?

इ) महताम् उदारता कस्य दृष्टान्तेन ज्ञायते ?

**३. माध्यमभाषया उत्तरत।**

महताम् उदारता श्लोके कथं वर्णिता ?

**४. रूपपरिचयं कुरुत।**

अम्भसा, महताम्, पिपासया, पयः

**५. समानार्थकशब्दं योजयित्वा वाक्यं पुनर्लिखत।**

चातकः पयसः कणान् जलधरं याचते।

**६. अमरकोषपङ्क्तिं लिखत।** जलधरः, अम्भः

**श्लोकः ७**

**१. माध्यमभाषया उत्तरत।**

'वयं पञ्चाधिकं शतम्' इति सूक्तिं स्पष्टीकुरुत।

**२. श्लोकात् सप्तम्यन्तपदानि चिनुत लिखत च।**

**३. श्लोकात् सङ्ख्यावाचकानि चिनुत लिखत च।**

**श्लोकः ८**

**१. सन्धिविग्रहं कुरुत।**

अ) पाठकश्चैव = _____ + च + _____।

आ) चान्ये = _____ + अन्ये।

इ) व्यसनिनो ज्ञेयाः = _____ + ज्ञेयाः।

ई) क्रियावान्स पण्डितः = क्रियावान् + _____ + पण्डितः।

**२. एकवाक्येन उत्तरत।**

अ) के व्यसनिनः उक्ताः ?

आ) कः पण्डितः उच्यते ?

**३. माध्यमभाषया उत्तरत।**

पाण्डित्यं कस्मिन् वर्तते ? यथार्थः पण्डितः कः ?

**४. सुभाषितात् समानार्थकशब्दं लिखत।**

वाचकः, अध्यापकः, शास्त्रविदः, कार्यकर्ता, विद्वान्, बोद्धव्याः।

**पठत अवगच्छत !** **विसर्गसन्धिः**

विश्वं विसर्गस्य।



# रम्यसंस्कृतम्। सङ्ख्याविशेषणानि – २।

## संवादम् इमं पठत।



मातामही – एकतः चतुःपर्यन्तं सङ्ख्यारूपाणि अधीतानि खलु ? पञ्चतः तु सङ्ख्यारूपेषु न लिङ्गभेदः। ताः यथावत् प्रयोक्तव्याः।

वेणुः – ज्ञातम्। तर्हि पञ्च आसन्दाः, पञ्च अङ्कन्यः पञ्च भवनानि वा।

सुधेन्दुः – तथा च सप्त बटवः, सप्त रज्जवः, सप्तैव च दिनानि।

पृथा – इतोऽपि अष्ट तारकाः, अष्ट मुनयः, अष्ट वसूनि।

मातामही – उत्तमम्। काश्चन सङ्ख्याः प्रसिद्धाः। यथा नव रात्रयः ...

वेणुः च पृथा च – सप्त ऋषयः, दश आननानि, अष्ट लक्ष्म्यः... त्रीणि भुवनानि, नव रत्नानि वा।

मातामही – पर्याप्तम्। अहम् अधुना कूटप्रश्नं वदामि। **भिः – भ्यः – भ्यः – आनाम् – सु**। किम् एतद् ?

सुधेन्दुः– (उच्चैः हसित्वा) न एषः कूटप्रश्नः। एते तु विभक्तिप्रत्ययाः। गतवर्षे अहं पठितवान् सम्यक् स्मरामि अधुना अपि।

वेणुः – ओहो सुधेन्दो ! सत्यमेव तीक्ष्णा जाता तव बुद्धिः। तर्हि एते सङ्ख्याप्रत्ययाः तृतीयातः सप्तमीपर्यन्तम्।

पृथा– यथा – **पञ्च, पञ्च, पञ्चभिः, पञ्चभ्यः, पञ्चभ्यः, पञ्चानाम्, पञ्चसु**। पञ्चतः नवदशपर्यन्तं रूपाणि पञ्च सङ्ख्या इव भवन्ति। सत्यं खलु ?

मातामही – आम्, अतीव मुदिताऽस्मि। यूयं सर्वे संस्कृतपटवः। इतःपरं संस्कृतभाषया खेलितुं समर्थाः।

सुधेन्दुः– तत्तु त्वया सह सम्भाषणेन किञ्चिद् व्याकरणाभ्यासेन च।

वेणुः – सङ्ख्यारूपाणि सम्यगधीत्य सम्भाषणे सङ्ख्यानाम् अधिकं प्रयोगं कुर्मः।

पृथा – अग्रिमे अवकाशे अन्यान् सङ्ख्याविशेषान् ज्ञातुम् आगच्छामः।

CJNBGB

जिज्ञासापत्रम्



## सङ्ख्यारूपाणि लिखित्वा वाक्यानि पूरयत।

१. तत्र _______ (५) बालकेषु कलहः उद्भूतः।
२. _______ (६) बिडालैः एकः एव मूषकः दृष्टः।
३. _______ (७) दीपानाम् एका आवलिः गृहे दृश्यते।
४. _______ (९) रात्रीणां समूहः नाम नवरात्रम्।
५. अपि जानासि _______ (७) ऋषीणां नामानि ?
६. कार्तिकेयः _______ (६) मुखैः वदति किम् ?
७. रावणस्य _____(१०)मस्तकेभ्यः किरीटाः पतिताः।
८. _______ (८) लक्ष्मीषु कति नामानि जानासि ?
९. राजा _______ (९) ऋषिभ्यः दानं दत्तवान्।
१०. _______ (६) वस्तुभ्यः _______ (३) वस्तूनि आवश्यकानि।
११. अस्माभिः _______ (८) भूपतीनां चरित्राणि पठितानि।

## सङ्ख्यारूपाणि

| (नित्यं बहुवचनम्) | | | |
|---|---|---|---|
| **षष्** | **अष्टन्** | **नवन्** | **विभक्तिः** |
| षट्/षड् | अष्ट / अष्टौ | नव | प्रथमा |
| षट्/षड् | अष्ट / अष्टौ | नव | द्वितीया |
| षड्भिः | अष्टभिः/ अष्टाभिः | नवभिः | तृतीया |
| षड्भ्यः | अष्टभ्यः/ अष्टाभ्यः | नवभ्यः | चतुर्थी |
| षड्भ्यः | अष्टभ्यः/ अष्टाभ्यः | नवभ्यः | पञ्चमी |
| षण्णाम् | अष्टानाम् | नवानाम् | षष्ठी |
| षट्सु/ षट्त्सु | अष्टसु/ अष्टासु | नवसु | सप्तमी |